# .. shrI nRisi.nhAShTakam ..

## ॥ શ્રીનૃસિંહાષ્ટકમ્ ॥

### Document Information

Text title : nrisimhAShTakam
File name : nrisimhAShTakam.itx
Category : aShTaka
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : N.Balasubramanian bbalu at satyam.net.in
Proofread by : N.Balasubramanian bbalu at satyam.net.in
Latest update : November 15, 2011
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીનૃસિંહાષ્ટકમ્ ॥

શ્રીમદકલઙ્ક પરિપૂર્ણ! શશિકોટિ-
શ્રીધર! મનોહર! સટાપટલ કાન્ત!।
પાલય કૃપાલય! ભવાંબુધિ-નિમગ્નં
દૈત્યવરકાલ! નરસિંહ! નરસિંહ! ॥ ૧॥

પાદકમલાવનત પાતકિ-જનાનાં
પાતકદવાનલ! પતત્રિવર-કેતો!।
ભાવન! પરાયણ! ભવાર્તિહરયા માં
પાહિ કૃપયૈવ નરસિંહ! નરસિંહ! ॥ ૨॥

તુઙ્ગનખ-પઙ્ક્તિ-દલિતાસુર-વરાસૃક્
પઙ્ક-નવકુઙ્કુમ-વિપઙ્કિલ-મહોરઃ ।
પણ્ડિતનિધાન-કમલાલય નમસ્તે
પઙ્કજનિષણ્ણ! નરસિંહ! નરસિંહ! ॥ ૩॥

મૌલેષુ વિભૂષણમિવામર વરાણાં
યોગિહૃદયેષુ ચ શિરસ્સુ નિગમાનામ્ ।
રાજદરવિન્દ-રુચિરં પદયુગં તે
દેહિ મમ મૂર્ધ્નિ નરસિંહ! નરસિંહ! ॥ ૪॥

વારિજવિલોચન! મદન્તિમ-દશાયાં
ક્લેશ-વિવશીકૃત-સમસ્ત-કરણાયામ્ ।
એહિ રમયા સહ શરણ્ય! વિહગાનાં
નાથમધિરુહ્ય નરસિંહ! નરસિંહ! ॥ ૫॥

હાટક-કિરીટ-વરહાર-વનમાલા
ધારરશના-મકરકુણ્ડલ-મણીન્દ્રૈઃ ।
ભૂષિતમશેષ-નિલયં તવ વપુર્મે
ચેતસિ ચકાસ્તુ નરસિંહ! નરસિંહ! ॥ ૬॥

ઇન્દુ રવિ પાવક વિલોચન! રમાયાઃ
મન્દિર! મહાભુજ!-લસદ્વર-રથાઙ્ગ!।
સુન્દર! ચિરાય રમતાં ત્વયિ મનો મે
નન્દિત સુરેશ! નરસિંહ! નરસિંહ! ॥ ૭॥

માધવ! મુકુન્દ! મધુસૂદન! મુરારે!
વામન! નૃસિંહ! શરણં ભવ નતાનામ્ ।

કામદ ધૃણિન્ નિખિલકારણ નયેયં
 કાલમમરેશ નરસિંહ! નરસિંહ! ॥ ૮॥

અષ્ટકમિદં સકલ-પાતક-ભયઘ્નં
 કામદં અશેષ-દુરિતામય-રિપુઘ્નમ્ ।
યઃ પઠતિ સન્તતમશેષ-નિલયં તે
 ગચ્છતિ પદં સ નરસિંહ! નરસિંહ! ॥ ૯॥

॥ ઇતિ શ્રી નૃસિંહાષ્ટકમ્ ॥

Encoded and proofread N.Balasubramanian bbalu@satyam.net.in

.. shrI nRisi.nhAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*